| छन्दसां इतिनामानि । | छन्दसां लक्षणगणाः । | छन्दसामुदाहरणानि । |
| --- | --- | --- |
| भ्रमरपदकम् | भाद्रनगा नसौ भ्रमरपदकमिदमभिहितम्<br>ऽ।।,ऽ।ऽ,।।।,।।।,।।।,।।ऽ | |
| शार्दूलम् | शार्दूलं वद मासषट्कयति मः सो जसौ रो मश्चेत्<br>ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽ।ऽ,ऽऽऽ | |
| केसरम् | अर्थाश्वाब्धैर्भैर्भनयरयुगैर्वृत्तं मतं केसरम्<br>ऽऽऽ,ऽ।।,।।।,।ऽऽ,ऽ।ऽ,ऽ।ऽ | |
| चलम् | म्भौ नृजौ भ्मौ चेच्चलमिदमुदितं युगैर्मुनिभिः स्वरैः<br>ऽऽऽ,ऽ।।,।।।,।ऽ।,ऽ।।,ऽ।ऽ | |
| लालसा | सैका वसुविरतिस्तनौ रैश्चतुर्भिर्युता लालसा<br>ऽऽ।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ | |
| लता | भवति नयुगलं रभौ रौ दशभिर्गजेन्द्रैर्लता<br>।।।,।।।,ऽ।ऽ,ऽ।।,ऽ।ऽ,ऽ।ऽ | |
| सिंहविस्फूर्जितम् | तद्भूतर्त्वश्वैर्मौ भ्मौ विरतिश्चेत् सिंहवि-<br>स्फूर्जितं यौ<br>ऽऽऽ,ऽऽऽ,ऽ।।,ऽऽऽ,।ऽऽ,।ऽऽ | |
| हरनर्त्तनम्<br>विबुधप्रिया इति च क्वापि । | रसौ जजौ भरसंयुतौ करिबाणखैर्हरनर्त्तनम्<br>ऽ।ऽ,।।ऽ,।ऽ।,।ऽ।,ऽ।।,ऽ।ऽ | |
| क्रौड़चक्रम् | इदं क्रौड़चक्रं सदीर्घं समस्तैर्यकारैः समेतम्<br>।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ, | |
| हीरकम् | हीरकमुदितं भसनजनैरिह रगयोरन्ततः<br>ऽ।।,।।ऽ,।।।,।ऽ।,।।।,ऽ।ऽ | |
| ऊनविंशत्यक्षरा इतिः । अतिधृतिः । | | |
| मेघविस्फूर्जिता<br>षष्ठे षष्ठे सप्तमे च यतिः । | रसर्त्वश्वैर्य्मौ नृसौ ररगुरुयुतौ मेघविस्फूर्जिता<br>स्यात् ।<br>।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ | कदम्बामोदाढ्या विपिनपवनाः केकिनः कान्तकेका<br>विनिद्राः कन्दल्यो दिशि दिशि मुदा दर्दुरा दृप्तनादाः ।<br>निशा नृत्यद्विद्युद्विलसितलसन्मेघविस्फूर्जिता चेत्<br>प्रियः स्वाधीनोऽसौ दनुजदलनो राज्यमस्मात् किमन्यत् ॥ |
| छाया<br>षष्ठे द्वादशे अन्ते च यतिः । | भवेत् सैवच्छाया तयुगगयुता स्यात् द्वादशान्ते<br>यदा<br>।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽऽ।,ऽऽ।,ऽ | अभीष्टं पुष्टो यो वितरति लसद्दोषारशाखोज्ज्वलः<br>स्फुरन्नानारत्नस्तवकिततनुश्चित्रांशुकालम्बितः ।<br>न यस्याङ्घ्रिच्छायामुपगतवतां संसारतीव्रातप-<br>स्तनोति प्रोत्तापं स जगदवतात् कंसारिकल्पद्रुमः ॥ |
| शार्दूलविक्रीड़ितम्<br>द्वादशे ऊनविंशतौ च यतिः । | सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूल-<br>विक्रीड़ितम्<br>ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽऽ।,ऽऽ।,ऽ | गोविन्दं प्रणमोत्तमाङ्ग ! रसने ! त्वं घोषयाहर्निशं<br>पाणी ! पूजयतं मनः ! स्मर पदे ! तस्यालयं गच्छतम् ।<br>एवञ्चेत् कुरुताखिलं मम हितं शीर्षादयस्तद् ध्रुवं<br>न प्रेक्षे भवतां क्षते भवमहाशार्दूलविक्रीड़ितम् ॥ |
| सुरसा<br>सप्तमे चतुर्दशे अन्ते च यतिः । | म्रौ भ्नौ यो नो गुरुश्चेत् स्वरमुनिकरणैराह<br>सुरसाम्<br>ऽऽऽ,ऽ।ऽ,ऽ।।,।।।,।ऽऽ,।।।,ऽ | कामक्रीड़ासतृष्णो मधुसमयसमारम्भरम्भात्<br>कालिन्दीकूलकुञ्जे विहरणकुतुकाकृष्टहृदयः ।<br>गोविन्दो वल्लवीनामधररससुधां प्राप्य सुरसां<br>शङ्के पीयूषपानप्रभवकृतसुखं व्यस्मरदसौ ॥ |
| फुल्लदाम<br>पञ्चमे द्वादशे अन्ते च यतिः ।<br>पुष्पदाम इति केचित् । | मो गौ नौ तौ गौ स्वरहयतुरगैः फुल्लदाम प्रसि-<br>द्धम्<br>ऽऽऽ,ऽ,ऽ,।।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ | शम्बल्लोकानां प्रकटितकदनं ध्वस्तमालोक्य कंसं<br>हृष्यच्चेतोभिस्त्रिदिववसतिभिर्व्योमसंस्थैर्विसृष्टम् ।<br>सुग्धामोदेन स्थगितदशदिगाभोगमाहूतभृङ्गं<br>मौलौ दैत्यारेन्यपतदनुपमं स्वस्तरोः फुल्लदाम ॥ |
| पञ्चचामरः | नयुगलगलघू रजौरलगा यदा स पञ्चचामरः<br>।।।,।।।,ऽ,।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।,ऽ | |
| बिम्बम् | इत्तं बिम्बाख्यं शरमुनितुरगैर्म्तौ नृसौ ततौ<br>चेद्गुरुः<br>ऽऽऽ,ऽऽ।,।।।,।।ऽ,ऽऽ।,ऽऽ।,ऽ | |